पण्डितवरश्रीमदमरसिंहविरचितः

नामलिङ्गानुशासनं

नाम

# अमरकोषः

विद्वद्वरश्रीभानुजिदीक्षितकृतया 'सुधा'ऽख्यया
'रामाश्रमी'त्यपरनामधेयया व्याख्यया सहितः

संस्कर्ता
महामहोपाध्यायः पण्डित-शिवदत्तदाधिमथः

संशोधकः
पण्डित-वासुदेवलक्ष्मणशास्त्री पणशीकरः

राष्ट्रियसंस्कृतसंस्थानम्
( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः
राष्ट्रियमूल्याङ्कन प्रत्यायनपरिषदा 'ए' श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )
नवदेहली

# किञ्चिन्निवेदनम्

‘अमरकोषः’ इत्याख्यस्य प्रसिद्धकोषग्रन्थस्य द्वितीयं पुनर्मुद्रितं संस्करणं प्रकाशयद् राष्ट्रियसंस्कृतसंस्थानकुटुम्बम् अतितरामानन्दमनुभवति। अस्य ग्रन्थस्य प्रथमे संस्करणे प्रकाशितानां प्रतिलिपीनाम् विद्वद्भिः स्वीकरणेनाऽस्माकं ग्रन्थविक्रय-भाण्डागारे एतत्पुस्तकविषयिणी रिक्तता समजनि। तथ्यमिदं ग्रन्थस्यास्य सुध्युपास्यताम् अभिव्यनक्ति। अनुसन्धानपरायणानां विद्यार्थिनां सुधीमतल्लिकानाञ्चाग्रहमुररी-कृत्यास्माभिः द्वितीयम् संस्करणम् अस्य ग्रन्थस्य प्रस्तूयते।

आशासे यल्लोकाभिरामतामवगाहमानं ग्रन्थरत्नमिदं यथा पूर्वं तथाऽस्मिन्नपि पर्याये विपश्चितां हृदि स्थानमवाप्स्यति सुरभारतीसमुपासकानां च प्रकामं मार्गदर्शनं विधास्यति। ग्रन्थस्यास्य पुनर्मुद्रणपुण्यपर्वणि प्रत्तसाहाय्येभ्यः शोधप्रकाशनप्रमुखमुखेभ्यः सर्वेभ्यः संस्थानकुटुम्बसदस्येभ्यो मुद्रकाय च भूरिशो धन्यवादान् प्रयच्छामि।

प.ना. शास्त्री

–प्रो. परमेश्वरनारायणशास्त्री

यति' इति विग्रह उचितः । कालवर्णत्वाद्वा । ('**कालो** मृत्यौ महाकाले समये यमकृष्णयोः') ॥ (१०) ॥*॥ दण्डस्य धरः । (दण्डं धरतीति विग्रहे 'कर्मण्यण्' (३।२।१) इत्यणि '**दण्डधारः**' अपि । ('**दण्डधारो** यमे राज्ञि) (११)॥*॥ श्राद्धस्य देवः अंशभाक्त्वात् । पितृपतित्वाद्वा ॥ (१२) ॥*॥ विवस्वतोऽपत्यम् । 'तस्यापत्यम्' (४।१।९२) इत्यण् ॥ (१३) ॥*॥ अन्तं करोति=अन्तयति । 'तत्करोति-' (वा० ३।१।२६) इति ण्यन्ताद् ण्वुल् (३।१।१३३) । (१४) ॥*॥ '**यमस्य**' चतुर्दश ॥

**राक्षसः कौणपः क्रव्यात्क्रव्यादोऽस्रप आशरः॥५९॥**
**रात्रिंचरो रात्रिचरः कर्बुरो निकषात्मजः ।**
**यातुधानः पुण्यजनो नैर्ऋतो यातुरक्षसी ॥ ६० ॥**

(**राक्षस इत्यादि** ॥) रक्षन्त्यस्मात् । 'रक्ष पालने' (भ्वा० प० से०) असुन् (उ० ४।१८९) प्रज्ञाद्यणि (५।४।३८) राक्षसः 'स्वार्थिकाः प्रकृतितो लिङ्गवचनान्यतिवर्तन्तेऽपि' (प० ५।३।६८) इति पुंस्त्वम् । (**राक्षसो** यातुधाने स्याच्चण्डायां **राक्षसी** स्मृता') ॥ (१) ॥*॥ कुणपं शवं भक्षयितुं शीलमस्य । 'शीलम्' (४।४।६१) इत्यण् । कोणं पाति । 'आतः-' (३।२।३) इति कः । कोणपस्य निर्ऋतेरयम्-कौणपः । 'तस्येदम्' (४।३।१२०) इत्यण् ॥ (२) ॥*॥ क्रव्यमाममांसमत्ति । 'क्रव्ये च' (३।२।६९) इति विट् । 'अदोऽनन्ने' (३।२।६८) इत्येव सिद्धेऽण् (३।२।१) बाधनार्थमिदम् । तेनाममांसभक्षके 'क्रव्यादः' इति न भवत्येव । ('**क्रव्यान्**मांसाशिरक्षसोः') ॥ (३) ॥*॥ कृत्तं छिन्नं तदेव पुनर्विशेषतः कृतं पक्वं च भुङ्क्ते इति क्रव्यादः । 'कृत्तविकृतपक्वशब्दस्य पृषोदरादित्वात् (६।३।१०९) क्रव्यादेशः' (३।२।६९) इति काशिका । शब्दार्णवेऽपि कृदध्याये—'सदान्नादकणादौ च स्यात्क्रव्यादाममांसभुक् । क्रव्यादः कृत्तविकृतपक्वमांसभुगुच्यते' इत्युक्तेः । तस्माद्योगार्थस्य व्यवस्थितत्वेऽपि गौण्या उभयोः सामान्येन प्रयोगः ॥ (४) ॥*॥ अस्रं रक्तं पिबति । 'आतोऽनुप-' (३।२।३) इति कः । नतु टक् (३।२।८) 'पिबतेः सुराशीध्वोः' (वा० ३।२।८) इति वचनात् । दन्त्यसवान् । ('**अस्रपा** तु जलौकायां डाकिन्यां राक्षसे तु ना') ॥*॥ न श्रपयति क्रव्यात्त्वात् **अश्रपः** । पचाद्यच् (३।१।१३४) तालव्यशवान् ॥ (५) ॥*॥ आशृणाति । 'शॄ हिंसायाम्' (क्र्या० प० से०) पचाद्यच् (३।१।१३४) ॥*॥ '**आशिरः**' इति पाठे 'अशेर्णिच्च' (उ० १।५२) इति किरच् । '**आशिरो धनुषः शङ्कुः** क्रव्यादोऽस्रप आशरः' इति संसारावर्तः । ('**आशिरो**ऽर्के राक्षसेऽग्नौ') ॥ (६) ॥*॥ रात्रौ चरति । 'चरेष्टः' (३।२।१६) । 'रात्रेः कृति विभाषा-' (६।३।७२) इति पक्षे मुम् ॥ (७) ॥*॥ (८) ॥*॥ कुर्बुरो वर्णेन । यद्वा— कर्वति । 'कर्व हिंसायाम्' (भ्वा० प० से०) 'मद्गुरादयश्च' (उ० १।४१) इति कुरच् । ('**कर्बुरं** सलिले हेम्नि **कर्बुरः** पापरक्षसोः । **कर्बुरा** कृष्णवृन्तायां शबले पुनरन्यवत्') ॥*॥ '**कर्वरः**' इति पाठान्तरम् । 'नैर्ऋतः **कर्वरः** क्रव्यात् कर्बुरो यातुरक्षसी' इति शब्दार्णवः । 'कॄ हिंसायाम्' (क्र्या० उ० से०) । कृणाति । 'कॄगॄशॄवृचतिभ्यः ष्वरच्' (उ० २।१२१) ॥ (९) ॥*॥ निकषाया आत्मजः । मूर्धन्यः पः ॥ (१०) ॥*॥ यातूनि रक्षांसि दधाति पुष्णाति स्वजातिपोषकत्वात् । धाञो 'बहुलमन्यत्रापि' (उ०२।७८) इति युच् । 'कृत्यल्युटः-' (३।३।११३) इति ल्युट् वा । यातूनि यातनाः धीयन्तेऽस्मिन्निति वा । ल्युट् (३।३।११७) । अन्तस्थादिः ॥*॥ जातु कदाचित् धानं संनिधानमस्येति (**जातुधानः**) चवर्गादिरपि ॥ (११) ॥*॥ विरुद्धलक्षणया पुण्यश्चासौ जनश्च । ('अथ **पुण्यजनो** यक्षे राक्षसे सज्जनेऽपि च') ॥ (१२) ॥*॥ निर्ऋतेरपत्यम् ॥ (१३) ॥*॥ याति । 'कमिमनिजनिगाभायाहिभ्यश्च' (उ० १।७३) इति तुः । अर्धर्चादिः (ग०२।४।३१) ॥ (१४) ॥*॥ रक्षन्त्यस्मात् । असुन् (उ० ४।१८९) 'भीमादयोऽपादाने' (३।४।७४) ॥(१५) ॥*॥ पञ्चदश '**राक्षसस्य**' ॥

**प्रचेता वरुणः पाशी यादसांपतिरप्पतिः ।**

**प्रचेता इत्यादि** ॥ प्रचेतयति । प्रकृष्टं चेतोऽस्येति वा । 'चिती संज्ञाने' (भ्वा० प० से०) । असुन् (उ०४।१८९) । '**प्रचेताः** पाशिनि मुनौ ना प्रकृष्टहृदि त्रिषु' ॥ (१) ॥*॥ व्रियते वृणोति वा । 'वृञ् वरणे' (स्वा० उ० से०) । 'कृवृदारिभ्य उनन्' (उ० ३।५३) । '**वरुणस्**तरुभेदेऽप्सु प्रतीचीपतिसूर्ययोः' ॥*॥ युचि (उ०२।७४) '**वरणः**' अपि । 'वरं वृणन्ति तं देवा वरदश्च वरार्थिनाम् । धातुर्वै वरणे प्रोक्तस्तस्मात्स **वरणः** स्मृतः' इति साम्बपुराणम् ॥ (२) ॥*॥ पाशोऽस्यास्ति । इनिः (५।२।११५) । ('**पाशी** पाशधरेऽप्पतौ' इति विश्वः ॥ (३) ॥*॥ यादसां पतिः । 'तत्पुरुषे कृति-' (६।३।१४) इत्यलुक् । ('**यादसांपतिर**म्भोधौ पश्चिमाशापतावपि') ॥*॥ लुकि तु '**यादःपतिः**' अपि ॥ (४) ॥*॥ अपां पतिः ॥*॥ लुकि '**अप्पतिः**' अपि ॥ (५) ॥*॥ पञ्च '**वरुणस्य**' ॥

**श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः ॥ ६१ ॥**
**पृषदश्वो गन्धवहो गन्धवाहानिलाशुगाः ।**
**समीरमारुतमरुज्जगत्प्राणसमीरणाः ॥ ६२ ॥**
**नभस्वद्वातपवनपवमानप्रभञ्जनाः ।**

**श्वसन इत्यादि** ॥ श्वसित्यनेन । 'श्वस प्राणने' (अ०

१—'पाशिनिपुणे पुंसि कृष्णे च वाच्यवत्' इति पुस्तकान्तरे ॥
२—अलुकि 'अपांपतिः' इत्यपि—मुकुटोक्तमेव युक्तम् । लुकि तु यादःपतिरपीत्यत्रापिना यादसांपतिरित्यस्य मूलकृत्संमतत्वेन अपांपतिरित्यस्य मूले छन्दोनुरोधादपाठात् ॥